नाणकानि कुत्र सन्ति?

नाणकानि एकत्र सन्ति।

फलानि कुत्र सन्ति?

फलानि एकत्र सन्ति।

किमर्थम्

बालकः किमर्थम् पठति?

बालकः ज्ञानार्थं पठति।

माता किमर्थम् पचति?

माता भोजनार्थं पचति।

बालिका किमर्थम् क्रीडति?

बालिका आनन्दार्थं क्रीडति।

कीदृशः

मल्लः कीदृशः अस्ति?

मल्लः बलिष्ठः अस्ति।

पत्रम् कीदृशम् अस्ति?

पत्रम् हरितम् अस्ति।

कति

कति गदाः सन्ति?

चतस्रः गदाः सन्ति।

कति घण्टाः सन्ति?

चतस्रः घण्टाः सन्ति।

कति द्रोण्यः सन्ति?

चतस्रः द्रोण्यः सन्ति।

APSCERT

सम्भाषणम्

इतः, ततः, गृहतः, कुतः,



१. लोकेशः पाठशालातः गृहं गच्छति।

२. लोकेशः (इतः) पाठशालातः गृहं गच्छति।

३. गृहतः क्रीडांगणं गच्छति।

४. ततः आपणं गच्छति।

५. आपणतः देवालयं आगच्छति

६. ततः गृहं आगच्छति।

७. कुमारः ..... आपणं गच्छति।

८. राधा ..... आगच्छति।

स्वीयमूल्याङ्कनम्

	आम्	न	किञ्चित्
१. अहं गीतं रागयुक्तं गातुं शक्नोमि ।			
२. गीतस्य भावं स्वीयवाक्यैः वक्तुं शक्नोमि ।			
३. संस्कृतभाषामधिकृत्य पञ्चवाक्यानि लेखितुं शक्नोमि।			
४. गीतचरणस्य भावं सम्भाषणरूपेण रचयितुं शक्नोमि ।			

2 आयुर्वेदः

Y6C8N9

अभ्यसनफलितानि

परितः विद्यमान अयुर्वेद वृक्षाणां - पत्राणां प्रयोजनानि उद्दिश्य वदन्ति। C G - 1

नित्यजीवने आयुर्वेद औषधादीनाम् उपयोगः अधिकतरः इति ज्ञास्यन्ति। C G - 2

आयुर्वेदशास्त्र ग्रन्थानां - तेषां लेखकानां नामानि लिखन्ति। C G - 3

शरीराङ्गानां गृहे पचनावसरवस्तूनि पाकशाले उपयुक्त वस्तूनां नामानि संस्कृतभाषायां सर्जनात्मकतया लिखन्ति। C G - 4

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।





१. चित्रे के बाधाम् अनुभवन्ति?

२. तेषां कीदृशम् उपचारं कुर्वन्ति?

३. गृहे भवान् कदापि एतादृशम् औषधं स्वीकृतवान् वा?

४. गृहवैद्यं नाम किम्?

पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।

शरीरम् उष्णं भवति। नासिकातः जलं स्रवति। शिरोवेदना अपि भवति। तर्हि वयं किं कुर्मः? वैद्यस्य सकाशं गत्वा औषधं स्वीकुर्मः।

कलुषिताहारसेवनं, विलम्बेन शयनं, उत्तमदिनचर्यायाः अपालनमेव ज्वरस्य कारणमिति उक्त्वा रोगस्य औषधं दत्त्वा प्रेषयति वैद्यः।

उत्तमदिनचर्याम्, ऋतूनामनुगुणम् आहारादिसेवननियमान् च यः सम्यक् पालयति सः स्वस्थः भवति। एतेषां विवरणं भारतीयपुरातनवैद्यशास्त्रत्वेन विख्याते आयुर्वेदे उपलभ्यते। शरीरं, पञ्चेन्द्रियाणि, आत्मा इत्येतेषां संयोगः एव आयुः इति, आयुषः विषये विवरणात्मकं शास्त्रम् आयुर्वेदः इति आयुर्वेदस्य निर्वचनम्।

शल्य-शालाक्य-कायचिकित्सा-भूतविद्या-कौमारभृत्य-अगदतन्त्र-रसायन-वाजीकरणानि आयुर्वेदस्य अष्टौ अङ्गानि। वैद्यशास्त्रस्य सम्पूर्णोऽपि विषयः द्विसहस्रवर्षेभ्यः पूर्वतः अस्मिन् शास्त्रे उपलभ्यते इत्यतः विश्वस्य प्रथमचिकित्साशास्त्रम्

इति अस्य ख्यातिः। बहूनां वैदिकलौकिकविषयाणां चर्चा अत्र कृता इत्यतः एतत् शास्त्रं पञ्चमवेदत्वेनापि परिगण्यते।

स्वस्थस्य स्वास्थ्यरक्षणोपायाः, रुग्णस्य रोगशमनोपायाः अस्मिन् शास्त्रे सम्यग् विवृताः सन्ति।

चरकसंहिता, सुश्रुतसंहिता इति ग्रन्थौ आयुर्वेदस्य आदिमौ। चरकमुनिना प्रणीता चरकसंहिता विभिन्नरोगान्, रोगशमनोपायान्, औषधानां गुणान्, औषधसेवनक्रमं च विवृणोति। कर्णनासिकादीनां बाह्यावयवानां, हृदयकालेयादीनाम् आन्तरिकावयवानां शस्त्रचिकित्साक्रमं विवृणोति सुश्रुतसंहिता। अतः ग्रन्थद्वयमपि आयुर्वेदग्रन्थेषु मूर्धन्यस्थाने तिष्ठति।

अष्टाङ्गहृदयं, शार्ङ्गधरसंहिता, भावप्रकाशः, माधवनिदानम् इत्यादयः बहवः प्रसिद्धाः आयुर्वेदग्रन्थाः संस्कृतभाषायाम् उपलभ्यन्ते।

आयुर्वेदः भारतीयानां नित्यजीवनस्य एकं प्रायोगिकं शास्त्रम्। तत्रत्यान् सर्वान् विषयान् भारतीयाः स्वीयजीवने अनुयान्ति। ततः वयं बहून् रोगनिवारणोपायान् शिक्षितवन्तः। उदाहरणार्थं वयम् आर्द्रकचायसेवनेन ज्वरं, तुलसीदलचर्वणेन कफं, ललाटे चन्दनलेपनेन शिरोवेदनाम्, कृष्णमरीचस्य सेवनेन कासं च निवारयामः। एवम् अस्माकं पूर्वजाः वैद्यस्य साहाय्यं विना प्राथमिकोपचारेण, औषधेन विना व्यवस्थितजीवनशैल्या च रोगनिवारणसमर्थाः अभवन्।

मनुष्यः कथं स्वस्थः भवति इति विषयम् आयुर्वेदः एकेनैव श्लोकेन सङ्क्षेपेण प्रतिपादयति। पश्यन्तु !

श्लो - मितं भुक्त्वा शतं जप्त्वा भुक्त्वा शतपथैः गतैः।
वामभागे शयानस्य भिषग्भिः किं प्रयोजनम्?।।

इत्थं भारतस्य प्राचीनवैद्यशास्त्रत्वेन विख्यातम् इदं शास्त्रम् अस्माभिः सर्वैः भारतीयैः आदरणीयम्, तत्रत्याः सर्वाः सूचनाः आचरणीयाश्च।

अर्थाः -

१. स्रवति	=	కారుచున్నది
२. विलम्बम्	=	ఆలస్యము
३. अङ्गानि	=	భాగాలు, అవయవాలు
४. संयोगः	=	కలయిక
५. रोगशमनोपायाः	=	రోగము తగ్గుమార్గములు
६. चर्वणम्	=	తినుట
७. विख्यातम्	=	గొప్ప

भावावगमनम् - प्रतिस्पन्दनम्

१. शृण्वन्तु, विचिन्त्य वदन्तु

अ. प्राथमिकचिकित्सारूपेण किं किं कुर्मः?

आ. हरिद्रा किमर्थम् उपयुज्यते?

इ. अनारोग्ये सति अस्माकं ज्योष्ठाः किं कुर्वन्ति?

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

आ. अधः दत्तम् गद्यांशं पठित्वा दत्तानां प्रश्नानां समाधानानि लिखन्तु

संस्कृतभाषायां चतुर्वेदाः सन्ति। ते ऋग्वेदः, यजुर्वेदः सामवेदः, अथर्वणवेदः। एकैकस्य वेदस्य उपवेदः अस्ति। अथर्वणवेदस्य उपवेदः आयुर्वेदः।

१. चतुर्वेदाः कुत्र सन्ति?

२. उपवेदानां नामानि लिखन्तु।

३. एकैकस्य वेदस्य किमस्ति?

४. आयुर्वेदः कस्य उपवेदः?

भावव्यक्तीकरणम् - सर्जनात्मकता

३. लेखनं, स्वीयरचना

अ. पठन्तु, लिखन्तु

१. आयुर्वेदस्य कति अङ्गानि?

२. आयुः इत्युक्ते किम्?

३. मूर्धन्यस्थाने स्थितं ग्रन्थद्वयं किम्?

४. केषाञ्चन आयुर्वेदग्रन्थानां नामानि लिखन्तु?

आ. चिन्तयन्तु, लिखन्तु

१. भवान् ज्वरपीडितः भवति चेत् किं करोति? इति स्वीयवाक्यैः लिखतु।

२. प्राथमिकचिकित्साविषये भवान् किं जानाति?

३. पाठस्य विषये स्वाभिप्रायं लिखतु।

४. सर्जनात्मकव्यक्तीकरणम्

अ. भवन्तः यदा रोगपीडिताः अभवन् तदा वैद्यं दृष्टवन्तः स्युरेव। तदा वैद्येन सह किं किं चर्चितवन्तः इति संवादरूपेण लिखन्तु।

भाषांशाः

५. पदजालाभिवृद्धिः, भाषाक्रीडाः

१. समानार्थकपदानि

१. जलम् - उदकम्, अम्बु

२. कारणम् - हेतुः, मूलम्

३. सकाशम् - समीपम्, निकटम्

४. शरीरम् - कायः, तनुः

५. ख्यातिः - कीर्तिः, यशः

२. अधो दत्तानि पदानि तेषां विरुद्धार्थकपदैः योजयन्तु

१. स्वस्थः	( )	अ) शीतलम्
२. सहायः	( )	आ) अविलम्बम्
३. सकाशम्	( )	इ) अस्वस्थः
४. उष्णम्	( )	ई) दूरम्
५. विलम्बम्	( )	उ) असहायः

AP SCERT

३. भिन्नम् पदम्

१. मनुष्यः नरः, मानवः, वानरः .....

२. ऋग्वेदः, यजुर्वेदः, आयुर्वेदः, सामवेदः .....

३. पादः, कर्मः, नासिका, नेत्रम् .....

४. हृदयम्, करः, मस्तिष्कम्, आन्त्रम् .....

५. हरिद्रा, आर्द्रकं, कृष्णमरीचं, चाकलेहम् .....

४. पदजालाभिवृद्धिः, भाषाक्रीडाः

अ. कोष्ठकस्थानि नामानि शरीराङ्गैः सह रेखया मेलयन्तु।

शिरः		ललाटः
केशाः		नासिका
कर्णौ		ओष्ठौ
मुखम्		जिह्वा
नेत्रम्		दन्ताः
कपोलः		चिबुकम्
हस्तः		अङ्गुली
नखाः		पादः
उदरम्		हृदयम्

७. परियोजनाकार्यम

अ. चित्रं दृष्ट्वा तत्तत् वस्तु प्राथमिकचिकित्सायां कथम् उपयुज्यते इति (ग्रन्थालयस्य / दूरदर्शनस्य साहाय्येन) एकं वाक्यं मातृभाषया लिखन्तु।

मधु

आर्द्रकम्

लशुनम्

सम्भाषणम्

तृतीयाविभक्तिः

बालकः

हस्तः

बालकः **हस्तेन** लिखति



बालकः

चमसः

बालकः **चमसेन** खादति

कर्षकः **हलेन** कर्षति



आपणिकः



तुला

आपणिकः तुलया तोलयति

अध्यापिका

लेखिनी



अध्यापिका लेखिन्या लिखति

१. कुमारः पादः गच्छति ।	कुमारः	.....	गच्छति।
२. बालिका चषकः पिबति।	बालकः	.....	पिबति।
३. सुरेशः कन्दुकम् क्रीडति।	सुरेशः	.....	क्रीडति।
४. गीता अङ्कनी चित्रं निर्माति।	गीता	.....	चित्रं निर्माति।
५. रासः सीता वनं गच्छति।	रामः	.....	वनं गच्छति।

AP SCERT

बालकः
1. ..... कन्दुकेन
कन्दुकम्
क्रीडति।
2. .....
सुधाखण्डः
लिखति
3. .....
द्विचक्रिका
गच्छति
4. .....
कूर्चः
चित्रं रचयति
5. .....
यानं
गच्छति
गृहिणी
6. .....
अङ्कनी
चित्रं अङ्कयति
7. .....
वेल्लनी
रोटिकाः निर्माति
8. .....
नौका
नदीं तरति
9. .....
घटः
जलम् आनयति
10. .....
चालनी
तण्डुलम् परिष्करोति
वृक्षः
11. .....
दण्डः
चलन्ति
12. .....
उपनेत्रम्
पश्यन्ति
13. .....
चमसः
खादन्ति
14. .....
कर्तरी
कर्तयन्ति
15. .....
लवित्रम्
लुनन्ति

सम्भाषणम्

शीघ्रम्, मन्दम्, उच्चैः, नीचैः, कथम्, सम्यक्



१. अश्वः शीघ्रं गच्छति।

२. व्याघ्रः ..... धावति।





१. पिपीलिका मन्दम् चलति।

२. कच्छपः ..... चलति।



१. वृकः उच्चैः वुक्कति।

२. सिंहः ..... गर्जति।

१. छात्राः नीचैः स्वरेण पठन्ति।

२. शिशुः ..... स्वरेण रोदिति।

१. बालकाः कथं क्रीडन्ति?

बालकाः सम्यक् क्रीडन्ति।



२. मेघः ..... वर्षति।

मेघः सम्यक् वर्षति।



सम्भाषणम्

अपि, अहं न जानामि

श्रीधरः पठति

राम,कृष्ण,लक्ष्मण,गोविन्दाः **अपि** पठन्ति

लक्ष्मी लिखति

लक्ष्मी, रमा, सीता, गीताः **अपि** लिखन्ति

अश्वः धावति।



अश्वः, शुनकः **अपि** धावति।

१. अहं तमिलं **न** जानामि।
२. अहं उर्दूभाषां **न** जानामि।
३. अहं पञ्जाबीभाषां **न** जानामि

स्वीयमूल्याङ्कनम्

	आम्	न	किञ्चित्
१. पाठं धारालतया पठितुं शक्नोमि ।			
२. आयुर्वेदस्य वैशिष्ट्यं वक्तुं शक्नोमि ।			
३. पाठस्य विषये स्वाभिप्रायं लेखितुं शक्नोमि ।			
४. वैद्यरोगिसम्भाषणं लेखितुं शक्नोमि ।			

3 अग्निः वायुश्च

B2Y3D5

अभ्यसनफलितानि

आंग्लनिघण्टुः - अमरकोशस्य (संस्कृतनिघण्टोः) मध्ये विद्यमान भेदान् ज्ञास्यति। C G - 1

संस्कृतश्लोकान् स्पष्टतया पठितुं शक्नोति।C G - 2

अग्नेः वायोः समानार्थकपदानि ज्ञास्यति।C G - 3

विविध वृत्तिकराणां तैः क्रियमाणं कार्याणि (क्रियापदानि संस्कृतभाषायां ज्ञास्यन्ति।C G - 4

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।

१. चित्रे किं प्रचलति? जनाः किं किं कुर्वन्ति?
२. वायुः द्रष्टुं शक्यते वा? वायोः अस्तित्वं कथं जानीमः?
३. अग्निः वायुः इव जीवने अत्यावश्यकाः प्रकृत्यंशाः के ?

पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।

आचार्यः - हे बालाः! श्वः दीपावलीपर्वदिनं खलु! विद्यालयाय विरामः दत्तः।

गोविन्दः - आर्य! एवं चेत् अहम् अद्य सायं जनकेन सह गत्वा बहु दीपावलिसामग्रीं क्रीणामि।

ललिता - अहं तु दीपान् ज्वालयामि।

आचार्यः - दीपावलीसामग्रीं क्रीणन्तु। दीपान् ज्वालयन्तु। एतत् सर्वम् अग्निसम्बद्धं भवति खलु! अतः अद्य अग्नेः नामानि स्मरामः।

अग्निर्वैश्वानरो वह्निः वीतिहोत्रो धनञ्जयः।
कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात्।।
बर्हिश्शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः।
आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः।।
लोहिताश्वो वायुसखश्शिखावानाशुशुक्षणिः।
हिरण्यरेता हुतभुक् दहनो हव्यवाहनः।।
सप्तार्चिर्दमुनाश्शुक्रः चित्रभानुर्विभावसुः।।

पवनः - आचार्य! अग्निः पवनेन विना न ज्वलति खलु!



आचार्यः- सत्यम्। अग्नेः वायुसखः इति नाम अपठन् किल! वायुं विना अग्निः न दहति। अतः वयं मित्रधर्मेण वायुनामानि अपि पठामः।

श्वसनस्स्पर्शनो वायुः मातरिश्वा सदागतिः।
पृषदश्वो गन्धवहः गन्धवाहानिलाशुगाः।।

समीरमारुतमरुत् जगत्प्राणसमीरणाः।
नभस्वद्वातपवनपवमानप्रभञ्जनाः।।

गोविन्दः- आचार्य! अग्नेः वायोः एतानि अनेकानि नामानि कथम् आगतानि?

आचार्यः- गान्धीमहोदयः किमुक्तवान् जानन्ति वा?

सर्वे - नैव। वदन्तु आचार्य!

आचार्यः- ''अहं पादरक्षाणां सीवनसमये चर्मकारः, वस्त्रक्षालनसमये रजकः, क्षुरकर्मसमये क्षुरकः भवामि'' इति।

तथैव अग्निः, वायुः, जलम्, आकाशः, भूमिः, सूर्यः इत्यादयः दैनन्दिनजीवने प्रतिपदं, प्रतिक्षणम् अनेकरूपैः अस्माकं साहाय्यं कुर्वन्ति। ते यदा यादृशं कार्यं कुर्वन्ति तदा तान् तादृशेन नाम्ना आह्वयामः।

सर्वे - धन्यवादाः आचार्य!

आचार्यः- शुभं भूयात्। दीपावल्याः शुभकामनाः।

अर्थाः -

१. क्रीणामि	=	కొనుచున్నాను
२. ज्वालयामि	=	వెలిగించుచున్నాను
३. चर्मकारः	=	చెప్పులు కుట్టువాడు
४. रजकः	=	బట్టలుతుకువాడు
५. शुभकामनाः	=	శుభాకాంక్షలు

भावावगमनम् - प्रतिस्पन्दनम्

१. शृण्वन्तु, विचिन्त्य वदन्तु

अ. धनञ्जयः इति कस्य नाम?

आ. कस्य नाम समीरः?

इ. अग्नेः वायोश्च नामानि वदन्तु ।

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ. श्लोकस्थानि अग्निनामानि वायुनामानि च गणयित्वा तेषां सङ्ख्यां लिखन्तु।

आ. अधः दत्तम् गद्यांशं पठित्वा दत्तानां प्रश्नानां समाधानानि लिखन्तु

अमरकोशं नाम संस्कृतभाषा निघण्टुः। अमरकोशं अमरसिंहेन विरचितम्। अमरकोशस्य अपरं नाम नामलिङ्गानुशासनम्। अमरसिंहः बौद्धमतं आचरितवान्।

१. अमरकोशं नाम किम्?

२. अमरकोशं केन विरचितम्?

३. अमरकोशस्य अपरं नाम किम्?

४. कः बौद्धमतं आचरितवान्?

भावव्यक्तीकरणम् - सर्जनात्मकता

३. लेखनं, स्वीयरचना

अ. पठन्तु, लिखन्तु

१) अग्निनामानि लिखन्तु।

२) वायुनामानि लिखन्तु।

३) गान्धीमहोदयः किम् उक्तवान्?

आ. चिन्तयन्तु, लिखन्तु

१) वायोः प्रयोजनानि लिखन्तु?

२) अग्नेः प्रयोजनानि लिखन्तु?

४. सर्जनात्मकव्यक्तीकरणम्

अ. चित्रं दृष्ट्वा वायुः, सूर्यः - एतयोः मध्ये कः बलवान् इति विषयस्य आधारेण ''अहं बलवान्'' इति शीर्षिकां दत्वा एकां कथां स्वीयभाषया लिखन्तु। तां नाटकरूपेण प्रदर्शयन्तु।

भाषांशाः

१. समानार्थकपदानि

१. जनकः - पिता, जनयिता
२. अग्निः - वह्निः, हुतभुक्
३. वायुः - पवनः, अनिलः
४. आचार्यः - गुरुः, उपाध्यायः
५. विद्यालयः - पाठशाला, गुरुकुलम्

२. अधो दत्तानि पदानि तेषां विरुद्धार्थकपदैः योजयन्तु

१. विनाशः	( )	अ) अनेकम्
२. एकं	( )	आ) निर्विरामः
३. विरामः	( )	इ) असत्यम्
४. सत्यम्	( )	ई) अधर्मः
५. धर्मः	( )	उ) अविनाशः

३. भिन्नम् पदम्

१. अग्निः, वह्निः, पावकः, वायुः
२. समीरः, मारुतः, वीतिहोत्रः, मरुत्
३. गोविन्दः, ललिता, पवनः, आचार्यः
४. अग्निः, वायुः, वृक्षः, जलम्
५. उपाध्यायः, रजकः, क्षुरकः, चर्मकारः

AP SCERT

४. गृहेषु प्रदर्शितानां नामफलकानाम् अनुसारं रेखया चित्राणि योजयन्तु। एका रेखा अन्यरेखां न स्पृशेत्।

शिक्षकः

सैनिकः

क्षुरकः

अर्चकः

चालकः

कुम्भकारः



गायिका

वैद्यः

आपणिकः

स्वर्णकारः

तन्तुवायः

सैनिकः



क्षुरकः

कुम्भकारः

नर्तकी

तन्तुवायः

कोष्टकस्थानि क्रियापदानि स्वीकृत्य के किं कुर्वन्ति इति लिखन्तु।

निर्माति, वयति, नृत्यं करोति, अर्चति, चालयति, तनोति, वैद्यं करोति, नापयति, विलिखति, गायति वार्ताम् आनयति, सीव्यति, रक्षति, विक्रीणाति, रथयति, यच्छति ।



वार्ताहरः



टङ्ककः



वैद्यः

चित्रकारः

शिक्षकः

चालकः

स्वर्णकारः

लोहकारः

लोहकारः

अर्चकः

गायिका

चित्रकारः

नर्तकी

आपणिकः

वार्ताहरः

टङ्ककः

उदा - सैनिकः रक्षति। ....

....

....

....

७. परियोजनाकार्यम्

अ. वायोः अग्नेश्च विविधसामाजिकोपयोगीनि दृश्यचित्राणि सङ्कलय्य, भित्तिपत्रिकासु स्थापयन्तु।

आ. विविधवृत्तीनां कर्मकराणां च चित्राणि सङ्गृह्य आनयन्तु, भित्तिपत्रिकासु लेपयन्तु।

चतुर्थीविभक्तिः

महिला



भिक्षुकः



महिला भिक्षुकाय भिक्षां ददाति

अग्रजः

अनुजा



अग्रजः अनुजायै फलं ददाति



पतिः

पत्नी

पतिः पत्न्यै हारं ददाति

बालकः



चित्रं

बालकः चित्राय वर्णं लेपयति

दानार्थे चतुर्थी

अधोलिखितानि वाक्यानि उदाहरणानुगुणं पूरयन्तु–

उदा0–	1.	जननी, ..पुत्रः.....।	1.	जननी ...पुत्राय..... मोदकं.. यच्छति ददाति।
	2.	अध्यापकः, छात्रः	2.	अध्यापकः ..... पुस्तकं यच्छति।
	3.	भक्तः, सूर्यः।	3.	:..... ..... अर्घ्यं यच्छति।
	4.	अर्चकः, देवः।	4.	.... पुष्पं यच्छति।
	5.	पूजकः, भक्तः।	5.	.... प्रसादं यच्छति।
उदा0–	6.	अग्रजः, ..अनुजा..।	6.	...अग्रजः... ..अनुजायै अङ्कनीं यच्छति।
	7.	जनकः, कन्या।	7.	.... कर्कटीं यच्छति।
	8.	बालकः, पाचिका।	8.	.... वेल्लनीं यच्छति।
	9.	शिक्षकः, छात्रा।	9.	.... लेखनीं यच्छति।
	10.	गृहिणी, भिक्षुकी	10.	.... भोजनं यच्छति।
उदा0–	11.	जननी, ...पुत्री..।	11.	....जननी... ...पुत्री.. मालां यच्छति।
	12.	गृहस्थः, गृहिणी।	12.	.... शाटिकां यच्छति।
	13.	पाचकः, विद्यार्थिनी।	13.	.... रोटिकां यच्छति।
	14.	धनिकः, भिक्षुकी	14.	.... वस्त्रं यच्छति।
	15.	वैद्यः, नन्दिनी।	15.	.... औषधं यच्छति।

AP SCERT

क्रियार्थायां क्रियायां चतुर्थी

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु-

बालकाः किमर्थं विद्यालयं गच्छन्ति ? ....अध्ययनाय.. (अध्ययनम्)

उदा0-1. छात्राः किमर्थं विद्यालयं गच्छन्ति ? छात्राः ..... विद्यालयं गच्छन्ति। (अध्ययनम्)

2. तरुणाः किमर्थं चित्रालयं गच्छन्ति ? ....

3. छात्राः किमर्थ पठन्ति ? ....

4. जनाः किमर्थ वायुविहारं कुर्वन्ति ? ....

5. जनाः किमर्थ भोजनं कुर्वन्ति ? ....

6. बालः किमर्थ रोदनं करोति ? ....

7. पर्यटकाः किमर्थम् आगच्छन्ति ? ....

8. बालकाः किमर्थं कोलाहलं कुर्वन्ति ? ....

9. जनाः किमर्थ तत्र (एकत्रिताः) सन्ति ? समवेताः ....

10. युवकः किमर्थ योगासनं करोति ? ....

AP SCERT

I ...कः... ...कस्मै... ..क्रुध्यति... ?

उदा०–	1.	रावणः	..रामाय ...	रामः
	2.	कंसः	.....	कृष्णः
	3.	दुर्योधनः	.....	युधिष्ठिरः
	4.	कर्णः	.....	अर्जुनः
	5.	दुर्जनः	.....	सज्जनः

क्रुध्यति कोधम्

II .. के ... केभ्यः . . ईर्ष्यन्ति... ?

उदा०–	6.	मूर्खाः	.....	पण्डिताः
	7.	राक्षसाः	.....	देवाः
	8.	कौरवाः	.....	पाण्डवाः
	9.	खलाः	.....	सज्जनाः
	10.	निर्धनाः	.....	धनिकाः

ईर्ष्यन्ति

III ...कः... ...कस्मै... ..द्रुह्यति... ?

उदा०–	11.	ताटका	.....	रामः
	12.	पूतना	.....	कृष्णः
	13.	तारकासुरः	.....	कुमारः
	14.	महिषासुरः	.....	दुर्गा
	15.	शुक्राचार्यः	.....	देवाः

द्रुह्यति द्रोहम्

IV ...कः... ...कस्मै... ...असूयति... ?

उदा०–	16.	चोरः	.....	सज्जनाः
	17.	शूर्पणखा	.....	लक्ष्मणाय
	18.	नकुलः	.....	सर्पः
	19.	महिला	.....	महिला
	20.	भिक्षुकः	.....	धनिकः

असूयति

सम्भाषणम्

भविष्यत् कालः



गच्छति	गमिष्यति
लिखति	लेखिष्यति
पिबति	पास्यति
खादति	खादिष्यति
वदति	.....
नयति	नेष्यति
.....	अन्विष्यति



बालकः पठिष्यति | अहं पठिष्यामि | बालिका खादिष्यति | अहं खादिष्यामि



बालकः क्रीडिष्यति | अहं क्रीडिष्यामि | बालिका गमिष्यति | अहं गमिष्यामि

बालकः पठिष्यति।

बालकाः पठिष्यन्ति।

बालिका खादिष्यति।

बालिकाः खादिष्यन्ति।

अहं पठिष्यामि।

वयं पठिष्यामः।

अहं खादिष्यामि।

वयं खादिष्यामः।

सम्भाषणम्

भवष्यित् - बहुवचनम्

वर्तमानकालम्		भविष्यत्कालम्	
एकवचनम्	बहुवचनम्	एकवचनम्	बहुवचनम्
प्रथमपुरुषः			
पठति	पठन्ति	पठिष्यति	पठिष्यन्ति
खादति	खादन्ति	.....	.....
पिबति	.....	.....	पास्यन्ति
.....	पतन्ति	पतिष्यति	.....
उत्तमपुरुषः			
लिखामि	लिखामः	लेखिष्यामि	लेखिष्यामः
स्वपामि	स्वपामः	.....	.....
चलिष्यामि	.....	.....	चलिष्यामः
भवामि	.....	भविष्यामि	.....

स्वीयमूल्याङ्कनम्

	आम्	न	किञ्चित्
१. पाठस्थश्लोकान् स्पष्टोच्चारणेन पठितुं शक्नोमि ।			
२. अग्नि-वायुनामानि वक्तुं शक्नोमि ।			
३. अग्नेः, वायोः प्रयोजनानि लेखितुं शक्नोमि ।			
४. चित्रं दृष्ट्वा कथां लेखितुं शक्नोमि ।			

4 श्रीरामवनप्रस्थानम्

X7W1Y7

अभ्यसनफलितानि

आदिकवेः श्रीरामायणस्य वैशिष्ट्यं ज्ञास्यन्ति। C G - 1
संस्कृतपुराणानां परिचयं प्राप्नुवन्ति। C G - 2
श्लोकान् स्पष्टोच्चारणेन पठन्ति - भावं लिखन्ति च। C G - 3
श्रीरामवत् प्रवर्तितव्यम् न रावणादिवत् इति ज्ञास्यन्ति। C G - 4

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।

१. चित्रे के के सन्ति?
२. ते कुत्र सन्ति? किमर्थम्?
३. सीता किं करोति?

पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।



१. ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथस्सुतम्।
प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया।।

२. यौवराज्येन संयोक्तुम् ऐच्छत् प्रीत्या महीपतिः।
तस्याभिषेकसम्भारान् दृष्ट्वा भार्याथ कैकयी।।

३. पूर्वं दत्तवरा देवी वरमेनमयाचत।
विवासनं च रामस्य भरतस्याभिषेचनम्।।

భావం – దశరథ మహారాజు ప్రజలకు హితం చేయాలనే కోరికతో సమస్తసద్గుణ సంపన్నుడూ, ఎల్లవేళలా ప్రజల హితాన్నే కోరేవాడూ, తనకు ప్రీతిపాత్రుడూ, మొదటికుమారుడునూ అయిన రామున్ణి యువరాజుగా చేయాలనుకున్నాడు. దశరథుని రాణులలో ఒక రాణి అయిన కైకేయి రామపట్టాభిషేకానికై సేకరించిన సామగ్రిని చూసి దశరథుడు పూర్వం తనకు రెండు వరాలిచ్చి ఉండుట వల్ల, వాటిలో ఒక వరంగా రామున్ణి అడవులకు పంపాలనీ, రెండవ వరంగా భరతునికి పట్టం కట్టాలనీ దశరథుని కోరింది.

४. स सत्यवचनाच्चैव धर्मपाशेन संयतः।
विवासयामास सुतं रामं दशरथः प्रियम्।।

భావం – సత్యవాక్యాన్ని పరిపాలించాలనే కారణంగా ఆ దశరథుడు, ధర్మపాశం చేత బంధింపబడి తన పుత్రుడైన రాముడిని, వనవాసానికి పంపాడు.

५. स जगाम वनं वीरः प्रतिज्ञामनुपालयन्।
पितुर्वचननिर्देशात् कैकेय्याः प्रियकारणात्।।

భావం – అతి పరాక్రమశాలియైన రాముడు కైకేయికి సంతోషం కలిగించడానికి, తండ్రి మాటమాత్రంగా చెప్పినంతనే దానిని ఆజ్ఞగా గ్రహించి, తన ప్రతిజ్ఞను నిలుపుకొంటూ అరణ్యానికి వెళ్ళాడు.

६. तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह।
स्नेहाद्विनयसम्पन्नः सुमित्रानन्दवर्धनः।।

భావం – లక్ష్మణుడు రాముడికి చాలా ఇష్టమైన తమ్ముడు. రామునిపట్ల సహజమైన ప్రేమ గలవాడు. వినయ సంపన్నుడు. అందువల్ల అరణ్యానికి వెళుతున్న ఆ రాముని వెంట వెళ్ళాడు. ఈ విధమైన ఉత్తమకార్యం చేయడంవల్ల తన తల్లి సుమిత్రకు కూడా ఆనందాన్ని కలిగించాడు.

७. रामस्य दयिता भार्या नित्यं प्राणसमाहिता।
सीताप्यनुगता रामं शशिनं रोहिणी यथा।।

భావం – రాముడికి ఇష్టురాలూ, భార్యా, ప్రాణముతో సమానురాలూ, నిత్యమూ రామునికి హితాన్ని కలిగించేదీ అయిన సీత కూడా రోహిణి చంద్రుణ్ణి అనుసరించినట్లు ఆ రామచంద్రుని అనుసరించి వెళ్లింది.

८. वने तस्मिन्निवसता जनस्थाननिवासिनाम्।
राक्षसां निहतान्यासन् सहस्राणि चतुर्दश।।

భావం – దండకారణ్యంలో నివసించేటపుడు రాముడు జనస్థానంలో నివసించే పద్నాలుగు వేల మంది రాక్షసులను సంహరించాడు.

९. ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्छितः।
सहायं वरयामास मारीचं नाम राक्षसम्।।

భావం – తనబంధువులైన రాక్షసుల సంహారాన్ని తెలుసుకొన్న రావణుడు క్రోధంతో మూర్ఛిల్లి, తేరుకొని మారీచుడనే రాక్షసుణ్ణి సహాయం కోరాడు.

१०. तेन मायाविना दूर-
मपवाह्य नृपात्मजौ।
जहार भार्यां रामस्य
गृध्रं हत्वा जटायुषम्।।

భావం – మాయలమారి అయిన ఆ మారీచుని సహాయంతో ఆ రామలక్ష్మణులను దూరంగా

పంపి, జటాయువనే గ్రద్ద అడ్డుపడగా దాన్ని కూడా చంపి ఆ రావణుడు సీతను అపహరించాడు.

११. स मार्गमाणस्तां देवीं रामस्सीतामनिन्दिताम्।
पम्पातीरे हनुमता सङ्गतो वानरेण ह॥
हनुमद्वचनाच्चैव सुग्रीवेण समागतः।

భావం – రాముడు సాధ్వియైన ఆ సీతాదేవిని వెదకుచూ పంప అనే నది ఒడ్డున హనుమంతుడనే వానరుణ్ణి కలిసాడు. హనుమంతుని సూచనమేరకు సుగ్రీవుణ్ణి కలిసాడు.

१२. ततः सुग्रीववचनाद्धत्वा वालिनमाहवे।
सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत्॥



భావం – రాముడు సుగ్రీవుని ప్రార్థన ప్రకారం వాలిని సంహరించి, అతని రాజ్యానికి సుగ్రీవుణ్ణి రాజుగా చేసెను.

१३. स च सर्वान् समानीय
वानरान् वानरर्षभः।
दिशः प्रस्थापयामास
दिदृक्षुः जनकात्मजाम्॥

భావం – వానరశ్రేష్ఠుడైన సుగ్రీవుడు వానరులందరినీ రప్పించి సీతాదేవిని అన్వేషించటానికై అన్ని దిక్కులకు పంపాడు.

अर्थाः -

१.	ज्येष्ठः	=	పెద్దవాడు
२.	यौवराज्येन	=	యువరాజుగా
३.	अभिषेकः	=	పట్టాభిషేకము
४.	पितुर्वचननिर्देशात्	=	తండ్రిమాటప్రకారం
५.	अनुजगाम	=	అనుసరించెను

भावावगमनम् - प्रतिस्पन्दनम्

१. शृण्वन्तु, विचिन्त्य वदन्तु

अ. पाठ्यांशचित्रे किं किम् अस्ति?

आ. रामस्य गुणान् वदन्तु?

इ. रामः केन सह मिलितवान्? किमर्थम्?

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ. श्लोकान् पठन्तु।

आ. श्लोकानां भावान् पठन्तु।

इ. भावं दृष्ट्वा वाक्यानि योजयन्तु।

१. यौवराज्येन संयोक्तुम् ऐच्छत् प्रीत्या महीपतिः।	అ. రాముడికి అరణ్యవాసం, భరతుడికి పట్టాభిషేకం.
२. स जगाम वनं वीरः प्रतिज्ञामनुपालयन्।	ఆ. పంపానదీ తీరమున హనుమంతునితో కలిసాడు.
३. पम्पातीरे हनुमता सङ्गतो वानरेण ह।	ఇ. యువరాజు పట్టాభిషేకం ప్రీతితో చేయదలిచాడు.
४. विवासनं च रामस्य भरतस्याभिषेचनम्।	ఈ. తండ్రిమాట జవదాటకుండా అరణ్యానికి వెళ్లాడు.

ई. अधः दत्तम् पद्यं पठित्वा दत्तानां प्रश्नानां समाधानानि लिखन्तु।

शशिना शोभते रात्रिः
सृष्टिः सूर्येन शोभते।
सत्येन शोभते वाणी
सदाचारेण जीवनम्।।

१. शशिना का शोभते?

.....

२. सृष्टिः केन शोभते?

.....

३. सत्येन का शोभते?

.....

४. सदाचारेण किं शोभते?

.....

भावव्यक्तीकरणम् - सर्जनात्मकता

३. लेखनं, स्वीयरचना

३. पठन्तु, लिखन्तु

१. रामस्य वनगमनम् अधिकृत्य लिखन्तु।

२. दशरथः किमर्थं रामं राजानं कर्तुम् ऐच्छत्?

३. कैकयी किम् अयाचत?

४. रामः किमर्थं वनं गतवान्?

५. रावणः कीदृशः?

६. केन कारणेन सीता अपहृता?

आ. चिन्तयन्तु, लिखन्तु

१. श्रीरामस्य स्वभावः कीदृशः?

२. केन कारणेन रावणः क्रोधमूर्छितः अभवत्?

३. रावणः किं कृतवान्?

४. सर्जनात्मकव्यक्तीकरणम्

अ. अधः दत्तस्य वाक्यद्वयस्य आधारेण सम्भाषणं लिखन्तु।

१. कैकेयी वरं पृच्छति।

२. रामः अरण्यं गच्छति।

भाषांशाः

१. समानार्थकपदानि

१. महीपतिः	-	राजा, भूपालः
२. जगाम	-	गतवान्, अगच्छत्
३. दयिता	-	प्रिया, इष्टः
४. हत्वा	-	मारयित्वा, संहार्य
५. प्रस्थापयामास	-	प्रेषितः

२. अधो दत्तानि पदानि तेषां विरुद्धार्थकपदैः योजयन्तु

१. ज्येष्ठः	( )	अ) शान्तः
२. कृद्धः	( )	आ) असत्यं
३. दृष्ट्वा	( )	इ) अन्यायं
४. सत्यं	( )	ई) कनिष्ठः
५. न्यायं	( )	उ) अदृष्ट्वा

३. भिन्नम् पदम्

१. ज्येष्ठः, श्रेष्ठः, प्रियः, शत्रुः

२. रामः, भरतः, लक्ष्मणः, दशरथः,

३. कौसल्या, सुमित्रा, सीता, कैकेयी

४. सुतः, जनकः, कुमारः, पुत्रः

५. जटायुः, वालिः, सुग्रीवः, हनुमान्

५. परियोजनाकार्यम्

अ. पाठस्य श्लोकानाम् आधारेण एकैकस्य श्लोकस्य एकैकं चित्रं सङ्कलय्य भित्तिपत्रे स्थापयन्तु।

सम्भाषणम्

च, अतः, एव

एषः शशः **एव**

एषा लेखिनी **एव**

एषः सिंहः **एव**



एतत् पुस्तकं **एव**

अतः

अद्यः आदिवासरः **अतः** विराम दिवसः

ह्यः शुक्रवासरः **अतः** अद्य शनिवासरः

पक्षी अल्पः अस्ति। **अतः** विहरति।

पञ्चमीविभक्तिः

कृषकः

ग्रामः

कृषकः ग्रामात् आगच्छति

महिला

गोशाला

महिला गोशालायाः आगच्छति



मुनिवरः

नदी

मुनिवरः नद्याः आगच्छति



सिंहः



वनम्

सिंहः वनात् आगच्छति

उदा०- 1.	वृक्षः पत्रम्	1. ..वृक्षात्.. पत्रं पतति।
2.	हस्तः सुधाखण्डः	2. ....पतति..।
3.	अश्वः बालकः	3. ....पतति..।
4.	आकाशः जलम्	4. ....पतति..।
उदा०- 5.	अध्यापिका पुस्तकालयः	5. अध्यापिका पुस्तकालयात् आगच्छति।
6.	मित्रं ग्रामः	6. .... आगच्छति..।
7.	छात्रा प्रवासः	7. .... आगच्छति।
9.	गवेषकः/विदेशः	9. .... आगच्छति।
10.	गृहिणी/गृहम्	10. .... आगच्छति।
11.	अर्चकः/मंन्दिरम्	11. .... आगच्छति।
12.	भगिनी/उद्यानम्	12. .... आगच्छति।
13.	नारदः/कैलासः	13. .... आगच्छति।
14.	मूषकः/बिलम्	14. .... आगच्छति।
15.	वैद्यः/चिकित्सालयः	15. .... आगच्छति।

APSCERT

सम्भाषणम्

मम अध्ययन वस्तूनि



१. उत्पीठिका
२. आसन्दः
३. दीर्घफलकम्
४. लेखिनी
५. सान्द्रमुद्रिका
६. सङ्गणकयन्त्रम्
७. अङ्कनी
८. तीक्ष्णदा
९. मापिका
१०. लेखनपुस्तकम्

स्वीयमूल्याङ्कनम्

	आम्	न	किञ्चित्
१. श्लोकान् स्पष्टोच्चारणेन पठितुं शक्नोमि ।			
२. श्लोकानां भावान् स्वीयवाक्यैः वक्तुं शक्नोमि।			
३. श्रीरामस्य स्वभावम् अधिकृत्य लेखितुं शक्नोमि।			
४. सूचनानुसारं सम्भाषणं लेखितुं शक्नोमि ।			

5 गीतोपदेशः

D3N3U2

अभ्यसनफलितानि

श्रीमद्भगवद्गीता मानसिकचिकित्सायाः अत्युत्तमोपायः इति ज्ञास्यति। C G - 1

शारीरक - मानसिक - वाचिक तपसामुद्दिश्य ज्ञस्यन्ति। C G - 2

प्रस्तुतविद्याव्यवस्थायां सर्वेषामपि भगवद्गीतायाः पठनं - पाठनं - प्राचारः आवश्यकः इति ज्ञास्यन्ति।C G - 3

श्लोकान् स्पष्टोच्चारणतया गातुं प्रभवन्ति। C G - 4

गीताकण्ठस्थीकरणस्पर्धासु भागग्रहणे उत्साहं प्रदर्शयेयुः। C G - 5

१. चित्रे के के सन्ति? तत्र किं प्रचलति?

२. महाभारतं केषां कथा?

३. नित्यजीवने के के उपदेशं कुर्वन्ति?

पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।



१. देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते।।

భావం - దేవతలను, బ్రాహ్మణులను, గురువులను జ్ఞానులను పూజించడం, శారీరకశుభ్రత, నిజాయితీ, బ్రహ్మచర్యం, అహింస అనునవి శారీరిక తపస్సులు.

२. अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।।

భావం - మనస్సుకు బాధకలిగించనివి, సత్యము, ప్రియము మరియు హితముతో కూడిన మాటలు, నిరంతర అధ్యయనము అనునవి వాచికతపస్సులు.

३. मनः प्रसादः सौम्यत्वं, मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत् तपो मानसमुच्यते।।

భావం - నిశ్చల మనస్సు, మృదుత్వము, మౌనము, మనోనిగ్రహము, అంతఃకరణశుద్ధి అనునవి మానసికతపస్సులు.



४. श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम्।।

భావం - చక్కగా ఇతరుల ధర్మాన్ని పాటించుట కంటె లోపాలు ఉన్నప్పటికీ మన ధర్మాన్ని మనం పాటించటం మంచిది. స్వభావసిద్ధమైన కర్మల నాచరించుట వల్ల పాపం కలగదు.

५. नियतं कुरु कर्म त्वं, कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिध्येदकर्मणः।।

భావం - అర్జునా ! నీవు చేయవలసిన కర్మలను సక్రమంగా ఆచరించు. ఏ పని చేయకుండా ఉండడంకంటే ఏదో ఒక పనిని చేస్తూ ఉండడం మేలు. పని చేయని సోమరులకు పూట గడవడం కూడ కష్టమే గదా !



६. यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।

భావం - పెద్దలు ఎలా ప్రవర్తిస్తారో అలాగే సామాన్యులు ప్రవర్తిస్తారు. సదాచారం పట్ల పెద్దలు ఏర్పరచిన ప్రమాణాన్నే సామాన్యజనులు అనుసరిస్తారు.



अर्थाः -

१. आत्मविनिग्रहः	=	మనోనిగ్రహము
२. स्वधर्मः	=	స్వంతధర్మము
३. भावसंशुद्धिः	=	వేదాధ్యయనము
४. मनः प्रसादः	=	మనోనిశ్చలత
५. आर्जवम्	=	నిజాయితీ

भावावगमनम् - प्रतिस्पन्दनम्

१. शृण्वन्तु, विचिन्त्य वदन्तु

अ. एकैकं चित्रं पश्यन्तु। चित्रे के के सन्ति? ते किं किं कुर्वन्ति इति वदन्तु।

आ. एकैकचित्रस्य भावं वदन्तु।

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ. श्लोकपादान् योजयन्तु, लिखन्तु।

१) देवद्विजगुरुप्राज्ञ	(अ) न प्रसिध्येदकर्मणः
२) श्रेयान् स्वधर्मो विगुणः	(आ) तत्तदेवेतरो जनः
३) शरीरयात्रापि च ते	(इ) पूजनं शौचम् आर्जवम्
४) यद्यदाचरति श्रेष्ठः	(ई) तपो मानसमुच्यते
५) भावसंशुद्धिरित्येतत्	(उ) परधर्मात्स्वनुष्ठितात्

उदा- देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।

आ. अधः दत्तम् पद्यं पठित्वा दत्तानां प्रश्नानां समाधानानि लिखन्तु।

अनभ्यासेन विषं विद्या
अजीर्णे भोजनं विषम्।
विषं सभा दरिद्रस्य
दुर्जनस्य सुभाषितम्।।

१. अनभ्यासे विषं का?.....
२. अजीर्णे विषं किम्? .....
३. कस्य सभा विषं भवति? .....
४. दुर्जनस्य सुभाषितम् किं भवति? .....

भावव्यक्तीकरणम् - सर्जनात्मकता

३. लेखनं, स्वीयरचना

अ. पठन्तु, लिखन्तु

१. लोकः कम् अनुवर्तते?
२. कः धर्मः श्रेयः? कः धर्मः न आचरणीयः?
३. वाचिकतपः नाम किम्?
४. निरन्तराध्ययनम् नाम किम्?
५. तपः कति विधम्?

इ. चिन्तयन्तु, लिखन्तु

१. अनुद्वेगकरं वाक्यं किमर्थं वक्तव्यम्?
२. स्वाध्यायः नाम कः?
३. मौनं कीदृशेषु सन्दर्भेषु आवश्यकम्?

४. सर्जनात्मकव्यक्तीकरणम्

अ. पाठान्तर्गतस्य षष्ठश्लोकस्य भावानुसारम् एकां कथां लिखन्तु।
आ. भगवद्गीताम् उद्दिश्य भाषणरूपेण वदन्तु।

APSCERT

५. पदजालाभिवृद्धिः, भाषाक्रीडाः

१. मञ्जूषातः पर्यायपदानि चित्त्वा अधः दत्ते स्थाने लिखन्तु।

कायः	ब्राह्मणः	उत्तमः	प्रपञ्चः	आर्यः	जगत्
विप्रः	भूसुरः	वरः	तनुः	देहः	भुवनम्

१. द्विजः - ....
२. शरीरम् - ....
३. श्रेष्ठः - ....
४. लोकः - ....

२. अधो दत्तानि पदानि तेषां विरुद्धार्थकपदैः योजयन्तु

१. शौचम्	( )	अ) परधर्मः
२. उद्वेगकरम्	( )	आ) हिंसा
३. प्रसादः	( )	इ) अशौचम्
४. स्वधर्मः	( )	ई) अप्रसादः
५. अहिंसा	( )	उ) अनुद्वेगकरम्

३. भिन्नम् पदम्

१. अहिंसा, आर्जवं, पूजनं, हिंसा .....
२. सत्यं, प्रियहितं, उद्रेकः, अनुदेवेगकरं .....
३. प्रसादः, क्रौर्यम्, सौम्यत्वं, मौनम् .....
४. देवः, द्विजः, गुरुः, राक्षसः .....
५. गेयम्, अक्षरम्, पदम्, वाक्यम् .....

६. परियोजनाकार्यम्

अ. भगवद्गीतायाः अध्यायानां नामानि ज्ञात्वा पट्टिकारूपेण लिखन्तु।

आ. भगवद्गीतायाः श्लोकान् कण्ठस्थीकुर्वन्तु।

षष्ठीविभक्तिः



१. भारतदेशः	भरतदेशस्य	
२. आन्ध्रप्रदेशः	आन्ध्रप्रदेशस्य	राजधानी अमरावती।
३. केरला	केरलायाः	राजधानी तिरुवनन्तपुरम्।
४. कर्णाटका	कर्णाटकायाः	राजधानी बेङ्गलूरु।
५. राजस्थान्	राजस्थानस्य	राजधानी जैपूर्।
६. असोम्	असोमस्य	राजधानी दिस्पूर्।
७. महाराष्ट्रः	.....	राजधानी .....
८. गोवा	.....	राजधानी .....
९. बीहार्	.....	राजधानी .....



उदा - दशरथस्य	(दशरथः)	पुत्रः
.....	(सुग्रीवः)	.....
.....	(लक्ष्मणः)	.....
.....	(कौसल्या)	.....
.....	(सीता)	.....
.....	(अयोध्या)	.....
कैकेय्याः	(कैकेयी)	.....

षष्ठीविभक्तिः

बालकस्य - बालिकायाः - भवनस्य



१. बालकः	- बालकस्य	१. बालिका	- बालिकायाः	१. पुस्तकम्	- पुस्तकस्य
२. रामः	-	२. माला	- मालायाः	२. पुष्पम्	- .....
३. चरणः	- चरणस्य	३. गीता	-	३. अन्नम्	- .....
४. गोपालः	-	४. रम्या	-	४. कङ्कणम्	- .....
५. सुरेन्द्रः	-	५. मालती	- मालत्याः	५. युतकम्	- .....
६. राजेशः	-	६. गीरी	-	६. वातायनम्	- .....
७. तेजः	-	७. नर्तकी	-	७. व्यजनम्	- .....
८. नारायणः	-	८. वाणी	-	८. यन्त्रम्	- .....

१. पञ्चतन्त्रः	-	.....	रचयिता	विष्णुशर्मा
२. अर्थशास्त्रम्	-	.....	रचयिता	चाणक्यः
३. भारतम्	-	.....	रचयिता	वेदव्यासः।
४. रामायणम्	-	.....	रचयिता	वाल्मीकिमहर्षिः।
५. कादम्बरी	-	.....	रचयिता	बाणभट्टः
६. स्वप्नवासवदत्ता	-	.....	रचयिता	भासः
७. रत्नावली	-	.....	रचयिता	हर्षवर्धनः
८. त्रिशती	-	.....	रचयिता	भर्तृहरिः

सूचना - मातापितृनामानि उपयुज्य षष्ठीविभक्तेः अभ्यासं कारयामः।

AP SCERT

सम्भाषणम्

पुरतः, पृष्टतः, वामतः, दक्षिणतः, उपरि, अधः।



१. आसन्दस्य पुरतः का अस्ति? उ) .....

२. आसन्दस्य पृष्टतः का अस्ति? उ) .....

३. आसन्दस्य दक्षिणतः कः अस्ति? उ) .....

४. आसन्दस्य वामतः कः अस्ति? उ) .....

५. आसन्दस्य उपरि किम् अस्ति? उ) .....

६. आसन्दस्य अधः कः अस्ति? उ) .....

AP SCERT

सम्भाषणम्



१. अहं छात्रः आसम् - अहं पठितवान्।

२. अहं स्नातकः आसम् - अहं प्रमाणपत्रं स्वीकृतवान्।

३. अहं अध्यापकः आसम् - अहं पाठितवान्।

४. अहं जननायकः आसम् - अहं उद्यमं कृतवान्।

५. अहं लेखकः आसम् - अहं पुस्तकानि लिखितवान्।

१. गिरिः ह्यः पाठशालां गतवान्। - वाणी ह्यः पाठशालां गतवती।

२. तेजः ह्यं भोजनं खादितवान्। - राधा ह्यः भोजनं खादितवती।

सम्भाषणम्

वर्तमानकाल क्रियापदम्	भूतकाल क्रियापदम् पुंलिङ्गे	भूतकाल क्रियापदम् स्त्रीलिङ्गे	भूतकाल क्रियापदम् नपुंसकलिङ्गे
पठति	पठितवान्	पठितवती	पठितवत्
लिखति	लिखितवान्	लिखितवती	लिखितवत्
खादति	खादितवान्	.....	खादितवत्
पिबति	पीतवान्	.....	.....
नयति	.....	नीतवती	नीतवत्
पतति	पतितवान्	.....	.....
चलति	.....	.....	.....
स्वपिति	सुप्तवान्	.....	.....
उत्तिष्ठति	.....	उथितवती	उथितवत्
हसति	हसितवान्	.....	.....
रोदिति	रोदितवान्	रोदितवती	.....

AP SCERT

सम्भाषणम्

भूतकालबहुवचनानि

ए.व	ब.व	ए.व	ब.व
पठितवान्	पठितवन्तः	गतवान्	गतवन्तः
पठितवती	पठितवत्यः	गतवती	गतवत्यः
लिखितवान्	लिखितवन्तः	स्नातवान्	स्नातवन्तः
लिखितवती	लिखितवत्यः	स्नातवती	स्नातवत्यः
पीतवान्	पीतवन्तः	खादितवान्	खादितवन्तः
पीतवती	पीतवत्यः	खादितवती	खादितवत्यः

स्वीयमूल्याङ्कनम्

	आम्	न	किञ्चित्
१. श्लोकान् स्पष्टोच्चारणेन पठितुं शक्नोमि ।			
२. श्लोकानां भावं वक्तुं शक्नोमि ।			
३. अनुद्वेगकरवाक्यं किमर्थं वक्तव्यम् इति लेखितुं शक्नोमि।			
४. षष्ठश्लोकस्य भावानुसारम् एकां कथां लेखितुं शक्नोमि।			

सम्भाषणम्

यदि - तर्हि

१. यदि सम्यक् पठति तर्हि उत्तम अङ्कान् प्राप्नोति।
२. यदि ..... तर्हि .....।
३. यदि ..... तर्हि .....।

१. यदि शीघ्रं गच्छति, तर्हि रेलयानं लभते।
२. यदि ..... तर्हि .....।
३. यदि ..... तर्हि .....।

यथा - तथा



यथा राजा तथा प्रजाः

१. यथा ..... तथा .....
२. यथा ..... तथा .....
३. यथा ..... तथा .....

यथा भवान् व्यवहरति तथा जनाः व्यवहरन्ति

१. यथा ..... तथा .....
२. यथा ..... तथा .....
३. यथा ..... तथा .....



6 वाटिकां याम


W3J5T6
चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।
भिण्डिः
आलुकम्
कूष्माण्डकम्
कृष्णनिम्बम्
मरीचम्
वार्ताकम्
शिगृः


लघुबाल ! लघुबाले !
वाटिकां याम
कण्डोलेन रुच्यानि
फलान्यानयाम
।।लघु बाल..।।
कदलीफलं मह्यम्
बदरीफलं तुभ्यम्
सेवफलानि अनुजाय
द्राक्षागुच्छम् अनुजायै
।।लघुबाल..।।
पनसफलानि जनकाय
अनासानि अम्बायै
पितामहाय च स्वादूनि
पितामह्यै च जम्बूनि
।।लघुबाल..।।


दाडिमानि मम कीराय
कपित्थानि गजराजाय
धेनवे च बहुबीजानि
मर्कटाय च आम्राणि
।।लघुबाल...।।
शीतफलानि सीतायै
मधुकर्कटी च रामाय
लक्ष्मणाय नारङ्गाणि
हनूमते च सर्वाणि
।।लघुबाल...।।
- डा. मरुधूरि नरसिंहाचार्यः

अर्थाः -

१. वाटिका = తోట
२. कण्डोलः = సంచి
३. कीरः = చిలుక
४. जनकः = తండ్రి
५. अनुजा = సోదరి

भावावगमनम् - प्रतिस्पन्दनम्

१. शृण्वन्तु, विचिन्त्य वदन्तु

अ. फलानां नामानि वदन्तु?

आ. भवन्तः कानि फलानि इच्छन्ति? किमर्थम्?

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ. गीते फलनामानि सन्ति। तानि चित्रेण योजयित्वा लिखन्तु।



आ. अधः दत्तम् श्लोकं पठित्वा दत्तानां प्रश्नानां समाधानानि लिखन्तु।

तुष्यन्ति भोजने विप्राः मयूराः घनगर्जने।

साधवः परसम्पत्तौ खलः परविपत्तिषु।।

१. विप्राः कुत्र तुष्यन्ति? .....

२. मयूराः कुत्र तुष्यन्ति? .....

३. साधवः कुत्र तुष्यन्ति? .....

४. खलाः कुत्र तुष्यन्ति? .....

भावव्यक्तीकरणम् - सर्जनात्मकता

३. लेखनं, स्वीयरचना

अ. पठन्तु, लिखन्तु

१. सीतारामयोः कानि फलानि समर्पणीयानि?

२. बालाः वाटिकां किमर्थं गच्छन्ति?

३. गजस्य उपरि कः अस्ति?

४. कदली, बदरी, सेवफलानि केभ्यः देयानि?

आ. चिन्तयन्तु, लिखन्तु

१. फलानि केषु सन्दर्भेषु उपकुर्वन्ति?

२. फलखादनेन कानि प्रयोजनानि?

४. सर्जनात्मकव्यक्तीकरणम्

भवतः जनकः भवतः कृते अनेकानि क्रीडनकानि, गृहोपकरणानि क्रीतवान्। तेषु कस्य कियत् मूल्यम् अभवत् इति भवान् पृच्छति। जनकः मूल्यं वदति। एतादृशम् एकं सम्भाषणं लिखतु।

६. पदजालाभिवृद्धिः, भाषाक्रीडाः

१. चित्राणि दृष्ट्वा बन्धुवाचकं पदं लिखन्तु।

....

....

....

२. समानार्थकपदानि

१. अनुजः	-	कनिष्टः, अवरजः
२. धेनुः	-	गौः, नवसूतिका
३. मर्कटः	-	वानरः, कपिः
४. अम्बा	-	माता, जननी
५. गजः	-	वारणम्, करी

३. अधो दत्तानि पदानि तेषां विरुद्धार्थकपदैः योजयन्तु

१. याम	( )	अ. तुभ्यम्
२. रुच्यानि	( )	आ. तव
३. मह्यम्	( )	इ. अरुच्यानि
४. लघु	( )	ई. निर्याम
५. मम	( )	ऊ. गुरु

४. भिन्नम् पदम्.

१. आलुकम्, कदलीफलम्, बदरीफलम्, सेवफलम् .....

२. पिता, पितामहः, पितामही, मतामहः .....

३. धेनुः, गजः, कीरः, मर्कटः .....

४. सीता, रामः, लक्ष्मणः, हनुमान् .....

५. आम्रफलम्, जम्बूफलम्, द्राक्षागुच्छम्, कपित्थफलम् .....

७. परियोजनाकार्यम्

गणेशपूजार्थम् एकविंशतिपत्राणि आवश्यकनि। तेषां पत्राणां नामानि ज्ञात्वा लिखन्तु। तानि पत्राणि सङ्गृह्य कक्ष्यायां प्रति आनयन्तु।

सम्भाषणम्

संख्यानां नामानि संस्कृतभाषया लिखन्तु

1. ..... 6. ..... 11. ..... 16.....
2. ..... 7. ..... 12. ..... 17. .....
3. ..... 8. ..... 13. ..... 18. .....
4. ..... 9. ..... 14. ..... 19. .....
5. ..... 10 ..... 15. ..... 20. .....

सप्तमीविभक्तिः

नीडः

वृक्षः

नीडः वृक्षे अस्ति

महिला

पाकशाला

महिला पाकशालायां पचति।

फलानि

स्थाली

फलानि स्थाल्याम् सन्ति



मीनः



जलं



मीनः जले अस्ति

१. विद्यालयः	-	१. लता	-	१. पुस्तकम्	- .....
२. मार्गः	-	२. पाठशाला	-	२. मन्दिरम्	- .....
३. गजः	-	३. शाखा	-	३. गगनम्	- .....
४. आसन्दः	-	४. दोला	-	४. आसनम्	- .....

सम्भाषणम्

भोजनसम्बन्धिशब्दाः



1	-	चषकः
2	-	स्थालिका
3	-	दर्वी
4	-	पात्रम्
5	-	चमसः
6	-	ओदनम्
7	-	सूपः
8	-	अवलेहः
9	-	व्यञ्जनम्
10	-	क्वथितम्
11	-	चित्रान्नम्
12	-	वटकाः
13	-	पर्पटाः
14	-	तक्रमरीचिकाः
15	-	दधि
16	-	पायसः
17	-	पयोहिमम्
18	-	लवणम्
19	-	मरीचिकाचूर्णः
20	-	गुडः

सम्भाषणम्

पूर्वं, आसीत्, अधुना

विश्वामित्रः पूर्वं राजा आसीत्
अधुना मुनिः



पूर्वं वृषभयानम् आसीत्।
अधुना बस् यानं अस्ति।



पूर्वं दूरवाणी आसीत्
अधुना चलद्वाणी
अस्ति।

स्वीयमूल्याङ्कनम्

	आम्	न	किञ्चित्
१. गीतं रागयुक्ततया गातुं शक्नोमि ।			
२. विविधफलानां नामानि संस्कृते वक्तुं शक्नोमि ।			
३. फलखादनेन प्रयोजनानि लेखितुं शक्नोमि ।			
४. गीतम् अभिनयं कर्तुं शक्नोमि ।			

7 युगादिः

S9L4L7

अभ्यसनफलितानि

भारतीय उत्सवानां वैशिष्ट्यं ज्ञास्यन्ति। C G - 1

पर्वदिनानां प्राकृतिकसम्बन्धविषये वक्ष्यन्ति। C G - 2

पर्वदिनेषु दीयमान प्रसादानां वितरणे औषधत्वं देवालयेषु सर्वजनसमानकत्वं सर्जनात्मकतया लिखन्ति। C G - 3

युगादि पर्वदिनवैशिष्ट्यं वदन्ति। C G - 4



१. चित्रे के किं कुर्वन्ति?
२. चित्रस्य आधारेण किं पर्वदिनम् ऊहितुं शक्यते?
३. भवते कः उत्सवः रोचते? तस्मिन् दिने भवान् किं करोति?

पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।

(बालः स्वविद्यालयस्यूतं क्षिपन्)

विवेकः - (उत्साहेन) अम्ब! श्वः विद्यालयं न गच्छामि।

अम्बा - किमर्थं न गच्छति?

विवेकः - अम्ब! श्वः संवत्सरादिः खलु!

अम्बा - सत्यम्। श्वः उगादि-उत्सवः अस्ति।

विवेकः - अम्ब! अद्य मम अध्यापकः उगादि-उत्सवस्य विषये बहून् विषयान् उक्तवान्। महाकविः कालिदासः 'उत्सवप्रियो हि लोकः' इति उक्तवान्। विश्वे सर्वेऽपि मानवाः कमपि उत्सवम् अवश्यमेव आचरन्ति। भारतीयानामस्माकं बहवः उत्सवाः सन्ति। तेषु संवत्सरादिः एकः महान् उत्सवः अयं युगाब्दः, युगादिः इत्यपि कथ्यते। तेलुगुभाषाभाषिणः एतत् पर्वदिनम् उगादिनाम्ना व्यवहरन्ति। एतम् उत्सवं वयम् अस्माकं सांस्कृतिकवर्षस्य प्रथमदिने अर्थात् चैत्रशुक्लप्रतिपदि आचरामः।

अम्बा - सत्यं पुत्र! सर्वेषु उत्सवेषु एषः उत्सवः अत्यन्तं विशिष्टः। अस्मिन् दिने जनाः उषःकाले उत्तिष्ठन्ति। गृहशुद्धिं कुर्वन्ति। आम्रतोरणैः द्वाराणि अलङ्कुर्वन्ति। अभ्यङ्गस्नानं कृत्वा नूतनवस्त्राणि धरन्ति। देवालयं गत्वा विशेषपूजां कुर्वन्ति च।

विवेकः - अम्ब! अस्मिन् दिने मधुर-आम्ल-लवण-कटु-कषाय-तिक्ताः इति षड्रुचियुक्तखाद्यं (उगादिपच्चडिं) खादामः इति शिक्षकः अवदत्। तत्र किं किं भवति?



अम्बा - अत्र गुडम्, इक्षुरसः वा, आम्रं, लवणं, कृष्णमरीचं, निम्बपुष्पाणि, तिन्त्रिणीरसः च भवन्ति। एते षड् पदार्थाः षड्रुचीनां द्योतकाः।

(एतावति काले पिता कार्यालयतः गृहं प्रविशति।)

पिता - पुत्र! अत्र अन्यः विशेषः अस्ति। अस्मिन् दिने सायङ्काले पञ्चाङ्गश्रवणमिति कार्यक्रमः अनुष्ठीयते। ग्रामस्य पुरोहितः ग्रामजनान् एकत्रीकृत्य संवत्सरस्य शुभाशुभफलानि बोधयति। सर्वे स्वनक्षत्रस्य अनुसारं गोचारफलानि, ग्रहसञ्चारफलानि च ज्ञात्वा शुभाशुभे विचारयन्ति।

विवेकः - जनक! मम शिक्षकः अन्ते उक्तवान् अस्मिन् दिने यत् कर्म क्रियते तदेव आवर्षं क्रियते इति विश्वासेन जनाः शुभकार्ये रताः भवन्ति। उत्सवोऽयं सर्वेषाम् उत्साहवर्धकः।

पिता - ''उत्सवाः समनुष्ठेयाः उत्साहपूर्तये'' इति उक्तिः अस्ति खलु।

(सर्वे उत्तिष्ठन्ति उत्सवाचरणस्य सन्नद्धतां कुर्वन्ति।)

अर्थाः -

१. युगादिः	=	ఉగాది
२. उत्सवः	=	పండుగ
३. देवालयः	=	గుడి
५. लवणम्	=	ఉప్పు
५. सायंकालः	=	సాయంత్రము

भावावगमनम् - प्रतिस्पन्दनम्

१. शृण्वन्तु, विचिन्त्य वदन्तु

अ. सम्भाषणे के के सन्ति?

आ. विवेकं शिक्षकः किं किम् उक्तवान्?

इ. उगादिपर्वदिने भवान्/भवती किं किमाचरति?

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ. अधः दत्तानि वाक्यानि उच्चैः पठन्तु।

१. युगादिं चैत्रशुद्धप्रतिपदि आचरामः।

२. षड्-रुचियुक्तम् उगादि-अवलेहं खादामः।

३. उत्सवाः उत्साहपूर्तये समनुष्ठेयाः।

४. भारतीयानामस्माकं बहवः उत्सवाः भवन्ति।

आ. अधः दत्तम् गद्यांशं पठित्वा दत्तानां प्रश्नानां समाधानानि लिखन्तु।

कालविभागे ६० वत्सराणि सन्ति। एकस्मिन् वत्सरे द्वे अयने स्थः।एकस्मिन् अयने षण्मासाः सन्ति। एकस्मिन् मासे द्वे पक्षे स्थः।

१. कालविभागे कति वत्सराणि सन्ति? .....

२. एकस्मिन् वत्सरे कति अयने स्थः? .....

३. एकस्मिन् अयने कति मासाः सन्ति? .....

४. एकस्मिन् मासे कति पक्षे स्थः? .....

AP SCERT

भावव्यक्तीकरणम् - सर्जनात्मकता

३. लेखनं, स्वीयरचना

अ. पठन्तु, लिखन्तु

१. विवेकस्य विद्यालये विरामः किमर्थं दत्तः?
२. कालिदासस्य उक्तिः का?
३. षड् रुचयः काः?
४. उगादि-अवलेहे कः कः पदार्थः भवति?
५. उत्सवदिने जनाः किं किं कुर्वन्ति?

आ. चिन्तयन्तु, लिखन्तु

१. भवतां गृहे युगादि - उत्सवं कथम् आचरन्ति?
२. भारतीयाः उत्सवदिनानि कथम् आचरन्ति?
३. भवान्/भवती कति उत्सवान् जानाति? तेषां नामानि लिखतु।
४. उत्सवाः किमर्थम्?

४. सर्जनात्मकव्यक्तीकरणम्

भवतां यः उत्सवः प्रियः अस्ति तमुद्दिश्य मित्रं प्रति लेखं लिखन्तु।

भाषांशाः

५. पदजालाभिवृद्धिः, भाषाक्रीडाः

१. समानार्थकपदानि

१. विशिष्टः	- प्रमुखः, महान्
२. शिक्षकः	- अध्यापकः, गुरुः
३. वर्षं	- संवत्सरः, अयनम्
४. उषःकालः	- प्रभातम्, प्रातःकालः
५. गृहम्	- सदनम्, सद्म

२. अधो दत्तानि पदानि तेषां विरुद्धार्थकपदैः योजयन्तु

१. अस्ति	( )	अ. अनेकः
२. एकः	( )	आ. अविशिष्टः
३. युगादिः	( )	इ. नास्ति
४. विशिष्टः	( )	ई. युष्माकम्
५. अस्माकम्	( )	ऊ. अन्तः

३. भिन्नम् पदम् अङ्कयन्तु

१. युगादिः, विजयदशमी, दीपावली, गणतन्त्रदिनोत्सवः .....
२. अम्बा, पिता, शिक्षकः, सुतः .....
३. संवत्सरादिः, युगान्तः, युगादिः, उगादिः .....
४. चलनचित्रदर्शनम्, अभ्यङ्गस्नानम्, नूतनवस्त्रधारणम्, देवपूजनम् .....
५. चूतपुष्पम्, मन्दारपुष्पम्, कमलपुष्पम्, निम्बपुष्पम् .....

६. परियोजनाकार्यम्

अ. ग्रन्थालयस्य साहाय्येन ऋतूनाम् अनुगुणम् आयोज्यमानानाम् उत्सवानां सूचीं कुर्वन्तु। प्रत्येकं ऋतोः वैशिष्ट्यं लिखित्वा भित्तिपत्रे लेपयन्तु।

आ. विविधप्रकारान् उत्सवान् भित्तिपत्रे लिखित्वा आनयन्तु।

सम्भाषणम्

रुचयः



सम्भाषणम्

पुष्पाणि



स्वीयमूल्याङ्कनम्

	आम्	न	किञ्चित्
१. पाठं पठितुं शक्नोमि ।			
२. युगादिपर्वदिनस्य वैशिष्ट्यं वक्तुं शक्नोमि ।			
